No. ४६३४

Title मंत्रमहोदधी शतचण्डी प्रयोग ग०

Author महीधर० कृष्णभट्ट० नारायणभट्ट सूनुः

Extent २३ पत्राणि Age सं. १९१०

Subject तंत्रम्

मंत्रमहोदध्यनुसारी प्राणचण्डीप्रयोगः

४६३४

4634

बस्ता ८

मन्त्रमहोदध्युक्तसारीशतचरणीप्रयोगः

४६२४

श्रीगणेशाय नमः ॥ अथ शतचंडिविधि ॥ तत्र मूलवचनानि ॥ शंकरस्य भवान्या वा प्रासाद
निकटे शुभं ॥ मंडपं द्वारवेद्याढ्यं कुर्यात्सध्वजतोरणं ॥ तत्र कुंडं प्रकुर्वीत प्रतीच्यां मध्यतोपि वा
स्नातानित्यकृयांस्तावरणुपाद्दत्वा वाडवान् ॥ जितेंद्रियान्सदाचारान्कुलीनान्सत्यवादि
नः ॥ सुलभान्स्वचंडिकापाठरतान्दलज्ञाद्यावत ॥ मधुपर्कविधानेन स्वर्णवस्त्रादिदानतः
जपार्थमासनं मालां दद्यात्तेभ्योपि भोजनं ॥ तेह विप्रान्नमस्कृत्यो मंत्रार्थालमानसाः ॥ भू
मौ शयानाः प्रत्येकं जपेयुश्चंडिकास्तवं ॥ मार्कंडेयपुराणोक्तं दशावृत्तः सचेतसः ॥ नवार्णं चं
डिकावमंत्रं जपेयुश्चायुतं पृथक् ॥ यजमानः पूजयेच्च कन्यानां दशकं शुभं ॥ द्विवर्षाद्याद
शाब्दांताः कुमारीः परिपूजयेत् ॥ गंधैः पुष्पैर्भक्ष्यभोज्यैर्वस्त्रैराभरणैरपि ॥ वेद्यां विरचिते र
म्ये सर्वतोभद्रमंडले ॥ घटं संस्थाप्य विधिवत्तत्रावाह्यार्चयेच्छिवां ॥ तदग्रे कन्यकाम्यापिपू १

पिपूजयेद्धूतलक्षणं नपि॥ उपचारैश्च विविधैः पूर्वोक्तावरणान्यपि॥ एवं चतुर्दिनं कृत्वा पंचमे
होममाचरेत्॥ पायसान्नैस्त्रिमध्वक्तैर्जात्याक्षारंभाफलैरपि। मातुलुंगैरिक्षुदंडैर्नारिकेलैः पुरेसि
लैः॥ जातीफलैराम्रफलैरन्नैर्मधुरवस्तुभिः॥ सप्तशत्यादशावृत्त्या प्रतिश्लोकं हुतं चरेत्
अयुतं च नवार्णेन स्थापितेग्नौ विधानतः॥ कृत्वा वरणं देवानां होमं तन्नाममंत्रतः॥ कृ
त्वा पूर्णाहुतिं सम्यक् देवमग्निं विसृज्य च॥ अभिषिंचेच्च यष्टारं विप्रौ दद्याच्च गोदक्षैः॥ नि
घं स्ववर्णमथवा प्रत्येकं दक्षिणां द्विजोत्तम्॥ भोजयेच्च शतं विप्रान्भक्ष्यभोज्यैः पृथग्विधैः॥ ते
भ्योपि दक्षिणां दत्वा गृह्णीयादाशिषस्ततः॥ एवं कृते जगद्धस्यं सर्वैर्न स्यं स्युपद्रवाः। राज्यं धने
श्वराः पुत्रा निष्टमन्यल्लभेत च॥ एतद्दशगुणं कुर्याच्चंडीसाहस्रजं विधि॥ इति मंत्रमहोदधौ शत
चंडीविधिमहावचनानि॥ तत्र यजमानः शुभे देशे मंडपं चिकीर्षुः गणेशाकूर्मशेषवसुधा

सहस्र

नांपूजनंकृत्वाशतचंड्यांषोडशहस्तंचंड्यांविंशतिहस्तंमंडपंप्रसाध्यताम्रपात्रेऽर्घ्यमादा
यजानुभ्यामवनिंगत्वा॥आगच्छसर्वकल्याणिवसुधेलोकसाक्षिणि॥उद्धृतासिवराहेण
सशैलवनकाननां॥मंडपंकारयाम्यत्रदूर्वेशुभलक्षणे॥गृहाणार्घ्यंमयादत्तंप्रसन्नाशु
2 भदाभव॥इतिभूम्यैअर्घ्यंदत्वा स्योनापृथिविभवेतिभूमिंप्रार्थ्यशतचंड्यांषोडशहस्तंस
हस्रचंड्यांविंशतिहस्तंमंडपंविधायतन्मध्येद्वाभ्यांहस्तमात्रांउच्छ्रायांगुलत्रयप्रांशुहवेदींकृ
त्वापश्चिमेशतचंड्यांद्विहस्तांसहस्रचंड्यांचतुर्हस्तांषड्हस्तांवाचतुरस्रांपद्मकुंडंवाकुर्यात्
मंडपमध्येऽष्टकोणांहस्तोच्छ्रांवेदींकृत्वातदुपरिसर्वतोभद्रमंडलंकृत्वोपरिवितानादिबं
ध्वाशतचंड्यांपल्लेनतदर्धेनतदर्धेनवासहस्रचंड्यांतुपलपंचकेनतदर्धेनवाऽष्टादश
भुजांदेवीमूर्तिंकुर्यात्॥अथप्रयोगः॥कर्त्ताशुभेतिथौसपत्नीकःकृताभ्यंगोभ्युषितःपूर्वे २

कृत्वा गृहस्तो भद्रं कर्णेभिरिति मंडपं प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविश्योपविश्याचम्य प्राणा
नायम्य देशकालौ स्मृत्वा मम दुर्गापालितद्वारा सर्वापच्छान्तिपूर्वकं दीर्घायुर्वीपुलधनपुत्रपौत्रा
द्यनवच्छिन्नसंततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयसदभीष्टसिध्यर्थं ममामुककृ
र्यसिध्यर्थं वा सनवग्रहमखां शतचंडीस्तवं ब्राह्मणद्वाराकारिष्ये ॥ तदंगतया ॥ गणेशपू
जनं पुण्याहवाचनं मातृकापूजनं ॥ नांदीश्राद्धं च करिष्ये ॥ इति संकल्प्य तानि कृत्वा ॥ आ
चार्यं वृत्वा प्रार्थयेत् ॥ आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः ॥ तथा त्वं मम यज्ञेस्मि
न्नाचार्यो भव सुव्रतेति ॥ ततो ब्रह्माणं वृत्वा ॥ यथा चतुर्मुखो ब्रह्मा स्वर्गे लोके पितामहः ॥
तथा त्वं मम यज्ञेस्मिं त्वं नो गुरुः पिता माता त्वं प्रभुस्त्वं परायणं ॥ त्वत्प्रसादाद्विप्रवर्यैः सर्वमिष्टा
न्मनोगतं ॥ सादस्यं ब्रारूप यज्ञेस्मिन्प्रसन्नस्त्वं सदा भव ॥ ब्रह्मा भव द्विजोत्तमेति प्रार्थयेत् ॥

ततः सदस्यं ॥ गणेशं जयार्थं चैकं ब्राह्मणं वृत्वा ॥ अस्मिन्कर्मणि कृत्विक्त्वेन त्वामहं वृणे ॥ इति
शान्त्यं प्रोनवत्कृत्विजो वृणुयात् ॥ आचार्यो दिक्शाम ॥ एवमाचार्यपक्षे दशमे ब्राह्मणाः ॥ त
तो मंडपपश्चिमे ऽष्टौ द्वारपालान्वृत्वा सर्वेषां प्रार्थना ॥ अस्य यागस्य निष्पत्तौ भवंतोभ्यर्थिता म
या ॥ सुप्रसन्नाः प्रकुर्वंतु शांतिकं विधिपूर्वकमिति ॥ ततः संभवे सर्वेषां मधुपर्कपूजां कृत्वा
अंगुलीयककर्णभूषणवस्त्रद्वयजलपात्रासनार्घ्यपात्राणि दद्यात् ॥ द्विगुणमाचार्याय ॥ अ
थाचार्यो ॥ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा ॥ स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु
॥ इति सर्षपान्विकीर्य पंचगव्येन कुशैः शुचिवो हव्येति ऋचेनापो हि ष्ठेति ऋचेन च मंडपं
प्रोक्ष्य स्वस्त्ययनं तार्क्ष्यमिति मंत्रद्वयं पठेत् ॥ ततस्तु श्लोकप्रकारेण मंडपपूजां प्रागग्निस्था
पनात्कुर्यात् ॥ अथाचार्यो ग्रहवेद्यां ग्रहान्संस्थाप्य संपूज्य मध्यवेद्यां पीठे उपविश्याचम्य २

प्राणानायम्य ॥ पृथ्वीत्यस्य मंत्रस्य ॥ मेरुपृष्ठऋषि ॥ कूर्मो देवता ॥ सुतलं छंदः ॥ आसने विनियोगः
॥ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वच धारमां देवी पवीत्री कुरु चासनं ॥ अपसर्पंतु ये
भूताये भूता भूमिसंस्थिता ॥ ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया ॥ अपक्रामंतु भूतानि पि
शाचाः सर्वतो दिशं सर्वेषामविरोधेन ब्रह्मकर्म समारभे ॥ अनंतासनाय नमः ॥ विमलासनाय न
मः ॥ पद्मासनाय नमः ॥ सर्वशक्तिकमलासनाय नमः ॥ इत्यासनविधिं कृत्वा ॥ दिव्यदृष्ट्यावलोक
नेन दिव्यान्विघ्नानुत्सार्य ॥ फट् इति मंत्रेण प्रोक्षणेनांतरिक्षस्थान्भूमौ वामपादपार्ष्णिघातेन
भौमान् ॥ उत्सार्य ॥ अस्त्राय फट् इति तालत्रयं कृत्वा ॥ ॐ नमः सुदर्शनाय अस्त्राय फट् इति मंत्रे
ण छोटिकयानुव्रज्याऽग्निप्राकारं कृत्वा मूलेनाचम्य प्राणानायम्य देशकालौ स्मृत्वाऽस्मिन्श
तचंडीकर्मणि श्रीमहालक्ष्म्याः नवार्णविधिना न्यासपूजादि करिष्ये ॥ इति संकल्प्य ॥ भूतशु

द्धिं कुर्यात् ॥ यथा मूलाधारस्थितां विसतंतुतनिभां विद्युत्प्रभां कुंडलिनीं ध्यात्वा मूलाधारा
द्वुत्थाप्य सुषुम्नामार्गेण हृदयमानीय हृदयात्प्रदीपकलिकाकारं जीवमादाय ब्रह्मरंध्रगतां
स्मरेत् । हंसः इति मंत्रेण जीवं ब्रह्मरंध्रस्थब्रह्मणि संयोज्य ॥ पादादी । जानुपर्यंतं । चतुष्कोणं
वज्रांकितं लं बीजयुक्तं स्वर्णवर्णं ब्रह्मनिवृत्तिसमानवायुयुक्तं भूमंडलं । स्मरेत् । जन्वाद्यानाभि
अर्धचंद्राकारं पद्मद्वयान्वितं वं बीजयुक्तं श्वेतं विष्णुप्रतिष्ठोदानवायुयुक्तं वंह्नीजलमंडलं
स्मरेत् ॥ नाभेराहृदयां त्रिकोणं स्वस्तिकान्वितं रं बिजयुक्तं रक्तं शिवविद्याव्यानवायुयुक्तं व
ह्निमंडलं स्मरेत् हृदयाद्याभ्रूमध्यं वृत्तं षड्बिंदुलांछितं यं बीजयुक्तं धूम्रवर्णं ईशानशांत्य ।
पानवायुयुक्तं वायुमंडलं स्मरेत् । भ्रूमध्यादाब्रह्मरंध्रं वृत्तं हं बीजयुक्तं शुभ्रं सदाशिवशांत्यती
ताप्राणवायुयुक्तं आकाशमंडलं स्मरेत् ॥ एवं भूतानि संचित्य प्रत्येकं प्रविलापयेत् ॥ भुवं जले ६

प्रविलापयामि ॥ जलं वह्नौ ॥ वह्निं वायौ ॰॥ वायौमाकाशे ॰॥ आकाशमहंकारे ॰॥ अहंकारं म-
हत्तत्वे ॰॥ महत्तत्वं ॥ प्रकृतौ ॰॥ प्रकृतिमात्मनि ॰॥ एवं प्रविलाप्य ॥ वामकुक्षौ पापपुरुषं वि-
चिन्त्य यं बीजेन १६ वारमावर्तितेन पूरकेण स्वशरीरयुक्तं संशोष्य रं बीजेन ॥ ६४ ॥ वारमाव-
र्तितेन कुंभकेन स्वशरीरयुक्तं पापपुरुषं दहेत् ॥ ततः पापपुरुषभस्म पृथक्कृत्वा यं बीजेन
३२ ॥ वारमावर्तितेन रेचकेन बहिर्निःसार्य वङ्स्यमृतबीजेन स्वशरीरं तस्माप्लाव्य लं बीजे-
न घनीकृत्य हं बीजेन अंगानि रचयेत् ॥ ततः आकाशादीनि भूतान्युत्पादयेत् ॥ आत्मनः
प्रकृतिः ॥ प्रकृतेर्महान् ॥ महतोऽहंकारः ॥ अहंकारादाकाशः ॥ आकाशाद्वायुः ॥ वायोरग्नि-
ओषधयः ः ॥ अग्नेरापः ॥ अद्भ्यः पृथिवी ॥ पृथिव्या ओषधीभ्योऽन्नं ॥ अन्नाद्रेतः । रेतसः पुरुषः ॥ स वा ए-
ष पुरुषोऽन्नरसमयः ॥ एवं भूतान्युत्पाद्य कुंडलिनीं ब्रह्मणः सकाशात् सुधाप्लावितं जीवमा-

दायसोहं मंत्रेण हृदये संस्थाप्यम् आधार गतां स्मरेत् ॥ इति भूतशुद्धिः ॥ अस्य प्राणप्राणप्र
तिष्ठा ॥ मंत्रस्य ॥ ब्रह्मविष्णुमहेश्वरा ऋषयः ॥ ऋग्यजुः सामानि छंदांसि ॥ चैतन्यरूपिणी जग
त्सृष्टिकर्त्री प्राणशक्तिर्देवता ॥ आं बीजं ह्रीं बीजं ॥ क्रौं कीलकं ॥ प्राणप्रतिष्ठापनो व० ॥ ॐ आं
ह्रीं क्रौं अं कं ५ आकाशवाय्वग्निजलभूम्यात्मने ॥ आं अंगुष्ठाभ्यां न० ॥ ॐ आं ह्रीं क्रौं इं चं ५ श
ब्दस्पर्शरूपरसगंधात्मने ईं तर्जनीभ्यां ॥ ॐ आं ह्रीं क्रौं उं टं ५ श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने
ऊं मध्यमाभ्यां ॥ ॐ आं ह्रीं क्रौं एं ५ वाक्पाणिपादपायूपस्थात्मने ऐं अनामिकाभ्यां ॥ ॐ
आं ह्रीं क्रौं ओं पं ५ वाचनादानविहरणोत्सर्गानंदात्मने औं कनिष्ठिकाभ्यां ॥ ॐ आं ह्रीं क्रौं अं
यं ५ मनोबुध्यहंकारचित्तात्मने अः करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदयादि ॥ ध्यानं ॥ रक्ता
ब्धिपोतारुणपद्मसंस्थां पाशांकुशौ विक्षुशरासबाणान् ॥ शूलं कपालं दधतीं कराब्जै रक्तां ५

त्रिनेत्रां प्रणमामि देवीं ॥ इति ध्यात्वा मानसैः संपूज्य हृदि हस्तं निधाय त्रिवारं प्राणप्रतिष्ठामंत्रं जपे
त् ॥ मंत्रश्च ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः मम प्राणा इह प्राणाः ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं
सं हं सः मम जीव इह स्थितः ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः मम सर्वेंद्रियाणि ॥ ॐ आं ह्रीं
क्रों यं रं लं वं शं षं सं हं सः मम वाङ्मनश्चक्षुः श्रोत्र घ्राण प्राणा इहागत्य सुखं चिरं तिष्ठंतु
स्वाहा ॥ ततः पंचदश प्रणवान् जपेत् ॥ अथ मातृकान्यासः ॥ अस्य मातृका विद्यायाः ॥ ब्रह्मारी
षिः ॥ गायत्रीछंदः ॥ मातृकासरस्वती देवता ॥ हलो बीजानि ॥ स्वराः शक्तयः ॥ न्यासे विनियोग
ः ॥ अं कं ५ आं अंगुष्ठाभ्यां० ॥ इं चं ५ ईं तर्जनीभ्यां ॥ उं टं ५ ऊं मध्यमाभ्यां० ॥ एं तं ५ ऐं अनामि
काभ्यां० ॥ ओं पं ५ औं कनिष्ठिकाभ्यां० ॥ अं यं १० अः करतलकरपृष्ठाभ्यां न० ॥ एवं हृदयादि
ध्यानं ॥ पंचाशद्वर्णैः रचितांगभागां धृतेंदुखंडां कुमुदावदातां ॥ वराभयपुस्तकमक्षसू

त्रंगिरं भजे सदधतिं त्रिनेत्रां । इति ध्यात्वा । मनसा संपूज्य न्यसेत् ॥ कंठस्य षोडशार दले प्रदक्षि
णेन षोडश स्वरान् न्यसेत् । अं नमः इत्यादि । हृदि १२ दले क्वादि ठांतान् ॥ नाभौ १० दले डादि
फांतान् ॥ लिंगमूले ६ दले बादि लांतान् । आधारे ४ दले वादि सांतान् ॥ भ्रूमध्ये २ दले हं । न
मः । क्षं नमः ॥ इ संमातृका ॥ अथ बहिर्मातृका ॥ ऋष्यादि पूर्ववत् ॥ अं नमः ललाटे ॥ आं नमः मु
खवृत्ते ॥ इं नमः दक्षनेत्रे ॥ ईं नमः वामनेत्रे ॥ उं नमः दक्षकर्णे ॥ ऊं नमः वामकर्णे ॥ ऋं नमः दक्ष
नासापुटे ॥ ॠं नमः वामनासापुटे ॥ लृं नमः दक्षगंडे ॥ लॄं नमः वामगंडे । एं नमः ऊर्ध्वोष्ठे
ऐं नमः अधरोष्ठे । ओं नमः ऊर्ध्वदंतपंक्तौ । औं नमः अधोदंतपंक्तौ । अं नमः शिरसि । अः नम
ः जिह्वायां । कं नमः दक्षहस्तमूले दक्षांसे । खं नमः दक्षकूर्परे । गं नमः दक्षमणिबंधे ॥ घं नम
ः दक्षहस्तांगुलिमूले । ङं नमः दक्षहस्तांगुल्यग्रे ॥ चं नमः वामहस्तमूले । वामांसे ॥ छं नमः वा ६

वामकूर्परे॥ जं नमः वाममणिबंधे झं नमः वामहस्तांगुलिमूले॥ ञं नमः वामहस्तांगुल्यग्रे॥ टं न
मः दक्षपादमूले। ठं नमः दक्षजानुनि॥ डं नमः दक्षगुल्फे॥ ढं नमः दक्षपादांगुलिमूले॥ णं नमः द
क्षपादांगुल्यग्रे। तं नमः वामपादमूले॥ थं नमः वामजानुनि। दं नमः वामगुल्फे॥ धं नमः वाम
पादांगुलिमूले॥ नं नमः वामपादांगुल्यग्रे॥ पं नमः दक्षपार्श्वे॥ फं नमः वामपार्श्वे॥ बं नमः पृष्ठे
॥ भं नमः नाभौ॥ मं नमः उदरे। यं नमः हृदये॥ रं नमः दक्षांसे॥ लं नमः ककुदि। वं नमः वामांसे॥
शं नमः हृदयादिदक्षहस्तांगुल्यग्रांतं॥ षं नमः हृदयादिवामहस्तांगुल्यग्रांतं। सं नमः हृदया
दिदक्षपादांगुल्यग्रांतं॥ हं नमः हृदयादिवामपादांगुल्यग्रांतं। ळं नमः हृदयादिउदरांतं
॥ क्षं नमः हृदयादिमुखांतं न्यसेत्॥ इति मातृकान्यासः॥ ततः॥ मूलेन त्रिप्राणानायम्य॥
अस्य मंत्रस्य॥ ब्रह्मविष्णुरुद्राऋषयः॥ गायत्र्युष्णिगनुष्टुभश्छंदांसि॥ महाकालि महा

7

लक्ष्मीमहासरस्वत्योदेवता ॥ नंदाशाकंभरिभिमाशक्तयः । रक्तदंतिकादुर्गाभ्रामर्योबीजानि ॥
अग्निवायुसूर्यस्तत्वानि ॥ जपपूजादौविनियोगः ॥ ब्रह्मविष्णुरुद्रेभ्य ऋषिभ्योनमः शिरसि गा
यत्र्युष्णिगनुष्टुब्भ्यश्छंदोभ्योनमः मुखे । महाकालीमहालक्ष्मिमहासरस्वतीभ्योदेवता ॥
भ्योनमः । हृदयो ॥ नंदाशाकंभरीभीमाभ्यःशक्तिभ्योनमः । दक्षस्तने । रक्तदंतिकादुर्गाभ्रा
मरीभ्योबीजेभ्योनमः वामस्तने ॥ अग्निवायुसूर्येभ्यस्तत्वेभ्योनमः । हृदये । ततः ऐं वे अंगु
ष्ठाभ्यां । ह्रीं तर्जनीभ्यां ॥ क्लीं मध्यमाभ्यां ॥ चामुंडायै अनामिकाभ्यां । विच्चे कनिष्ठिका
भ्यां । ऐं ह्रीं क्लीं चामुंडायै विच्चे करतलकरपृष्ठाभ्यां । एवं हृदयादि । नमः ऐं ब्रह्मरंध्रे । नमः
ह्रीं दक्षनेत्रे ॥ नमः क्लीं वामनेत्रे । चां नमः दक्षकर्णे मुं नमः वामकर्णे । डां नमः दक्षनासायांपुटे ७
यै नमः वामनासापुटे विं नमः मुखे । च्चे नमः गुह्ये । मूलेन अष्टवारं व्यापकं कृत्वा । ध्यानं ॥

॥ खड्गं चक्रगदेषुचापपरिघान्शूलं भुशुंडीं शिरः शंखं संदधतीं करैस्त्रिनयनां सर्वांग
भूषावृतां॥ यां हंतुं मधुकैटभौ जलजभूस्तुष्टाव सुप्ते हरौ नीलाश्मद्युतिमास्यपाददश
कां सेवे महाकालिकां॥१॥ अक्षस्रक्परशुं गदेषुकुलिशं पद्मं धनुं कुंडिकां दंडं शक्तिमसिं
च चर्मजलजं घंटां सुराभाजनं॥ शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां सेवे सैरि
भमर्दिनीमिह महालक्ष्मिं सरोजो॥द्भवां॥२॥ घंटां शूलहलानि शंखमुसले चक्रं धनुः सा
यकं हस्ताब्जैर्दधतीं घनांतविलसच्छीतांशुतुल्यप्रभां॥ गौरीदेहसमुद्भवां त्रिजगता
माधारभूतां महापूर्वामत्र सरस्वतीमनुभजे शुंभादिदैत्यार्दिनीं॥३॥ एवं ध्यात्वा मनसा संपू
ज्य॥ वेद्यां सर्वतोभद्रं कृत्वा तत्र देवता आवाह्य प्रतिष्ठाप्य संपूज्य तन्मध्ये महीं घोरिति भू
मिं स्पृष्ट्वा ओषधयः संवदंत इति सप्तधान्यानि क्षिप्त्वा॥ आकलशेष्विति हेमं राजतं ता

मृन्मयं वा कलशं संस्थाप्य इमं मे गंगे इत्युदकेनापूर्य गंधद्वारामिति गंधं या ओषधीरिति
४ सर्वौषधीः ॥ काण्डात्काण्डादिति दूर्वाः अश्वत्थेव इति पंचपल्लवान् ॥ स्योना पृथिवीति सप्तमृ
दः याः फलिनीरिति फलं सहिरण्यानीति पंचरत्नानि ॥ हिरण्यरूप इति हिरण्यं च क्षिप्त्वा युवा
सुवासा इति रक्तवस्त्रेण सूत्रेण वा वेष्ट्य पूर्णा दर्वीति कलशाग्रे सतण्डुलं पूर्णपात्रं निधाय । क
लशे वरुणं संपूज्य ॥ तत्र वस्त्रे यंत्रं लिखेत् ॥ त्रिकोणषट्कोणाष्टदलचतुर्विंशतिदलचतुर
स्रात्मकं यंत्रं विलिख्य तत्र शतचंड्यां हेमपलेन तदर्धेन तदर्धेन वा कृतां सहस्रचंड्यां विंशति
दशपंचान्यतमसुवर्णेन कृतां देवीमूर्तिं रक्तपट्टदुकूलयुगच्छन्नामग्न्युत्तारणपूर्वकं संस्थाप्य
पूजयेत् ॥ यथा ॥ स्ववामे स्वक्षालितं मूलेन जलपूरितं कलशं निधाय तत्र वरुणं सं
पूज्य गंधपुष्पाक्षतपात्राणि दक्षिणे स्थापयेत् ॥ ततः स्ववामे एव त्रिकोणषट्कोणव ६

त्र चतुरस्रात्मकं यंत्रं गंधादिना भूमौ विलिख्य तत्र त्रिपादिकां निधाय मं दशकलात्मने वह्नि
मंडलाय महाकाली महालक्ष्मी महासरस्वत्यर्घ्यपात्राधाराय नमः ॥ इत्याधारं संपूज्य व
ह्नेर्दश कलाः समर्चयेत् ॥ धूम्रार्चिषे नमः ॥ ऊष्मायै ॥ ज्वलिन्यै ॥ ज्वालिन्यै ॥ विस्फुलिंगिन्यै
॥ सुश्रियै ॥ सुरूपायै ॥ कपिलायै नमः ॥ हव्यवहायै ॥ इति संपूज्य ॥ मूलेन प्रक्षालितं पात्रं
संस्थाप्य ॥ अं द्वादशकलात्मने सूर्यमंडलाय महाकालि ॥ महालक्ष्मी ॥ महासरस्वति अर्घ्यपात्रा
य नमः ॥ इति पात्रं संपूज्य ॥ तपिन्यै ॥ तापिन्यै ॥ धूम्रायै ॥ मरीच्यै ॥ ज्वालिन्यै ॥ रुच्यै ॥ सु
षुम्नायै ॥ भोगदायै ॥ विश्वायै ॥ बोधिन्यै ॥ धारिण्यै ॥ क्षमायै ॥ इति संपूज्य ॥ ततः क्षं लं ॥
हं सं षं शं वं लं रं यं मं भं बं फं पं नं धं दं थं तं णं ढं डं ठं टं ञं झं जं छं चं ङं घं गं खं कं अः अं औं ओं ऐं एं ॡं ॠं ऌं
ऋं ऊं उं ईं इं आं अं इति विलोममातृकां मूलमंत्रं च पठन् जलमापूर्य ॥ उं षोडशकलात्मने ॥

सोममंडलाय मातृकादि। महालक्ष्मि। महासरस्वत्यर्घ्य। पात्रामृताय नमः। इति कलशं संपूज्य
॥ अमृतायै ०॥ मानदायै ०॥ पूषायै ०॥ तुष्ट्यै ०॥ पुष्ट्यै ०। रत्यै ०। धृत्यै ०। शशिन्यै ०। चंद्रिकायै ०॥ कां-
त्यै ०॥ ज्योत्स्नायै ०॥ श्रियै ०॥ प्रीत्यै ०॥ अंगदायै ०॥ पूर्णायै ०। पूर्णामृतायै ०॥ इति संपूज्य॥ षडं-
गमंत्रैरभ्यर्च्य॥ अंकुशमुद्रया तीर्थान्यावाह्य शंखचक्रमुसलधेनुयोनिमुद्राः प्रदर्श्य
१ मत्स्यमुद्रयाछाद्याष्टवारं मूलं जपेत्॥ तज्जलं किंचित्कुंभे क्षिप्त्वा ऽर्घ्योदकेनात्मानं पूजासा-
धनानि च त्रिः प्रोक्षेत्॥ देवतात्मनोर्मध्ये विशेषार्घ्यं सामानार्घ्यं च स्थापयेत्॥ ततः पीठपूजा-
मंडूकाय नमः॥ कालाग्निरुद्राय ०॥ आधारशक्त्यै ०॥ कूर्माय न ०॥ भूम्यै ०॥ सुधासागराय
०॥ श्वेतद्वीपाय ०॥ कल्पवृक्षेभ्यो ०॥ मणिहर्म्याय ०॥ हेमपीठाय ०॥ इति मध्ये संपूज्य॥ आ-
ग्नेयादिकोणेषु॥ धर्माय ०॥ ज्ञानाय ०॥ वैराग्याय ०॥ ऐश्वर्याय ०॥ अथ पूर्वादिदिक्षु॥ अध ऐ

र्माय॰॥अज्ञानाय॰॥अवैराग्याय॰॥अनैश्वर्याय॰॥इति संपूज्य॥पुनर्मध्ये॥अनंताय
॰॥पद्माय॰॥आनंदमयकंदाय॰॥संविन्नालाय॰॥विकारमयकेसरेभ्यो॰॥प्रकृत्यात्मकप
त्रेभ्यो॰॥पंचाशद्वर्णकर्णिकायै॰॥सूर्यमंडलाय नमः॰॥चंद्रमंडलाय नः॰॥वह्निमंडलाय
॰॥सत्वाय नः॰॥रजसे नः॰॥तमसे॰॥आत्मने॰॥अंतरात्मने॰॥परमात्मने॰॥ज्ञानात्मने॰॥
मायातत्वाय॰॥कलातत्वाय॰॥विद्यातत्वाय॰॥परतत्वाय॰॥इति पीठदेवतासंपूज्य पीठश
क्तीः पूजयेत्॥पुरत आरभ्याष्टदिक्षु मध्ये च॥जयायै॰॥विजयायै॰॥अजितायै॰॥अपराजिता
यै॰॥नित्यायै॰॥विलासिन्यै॰॥दोग्ध्यै ग्ध्यै॰॥अघोरायै॰॥मंगलायै॰॥ॐ ह्रीं सर्वशक्तिकमलास
नाय सर्वात्मसंयोग्यपीठात्मने नमः॥इति पीठपूजा॥ततः हार्दस्थां ज्योतिर्मयीं सपरीवारां महा
लक्ष्मीं ध्यात्वा॥आगच्छ वरदे देवि दैत्यदर्पनिषूदिनि॥पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये

॥ दुर्गादेवि समागच्छ सांनिध्यमिह कल्पय। बलिपूजां गृहाणेमामष्टाभिः शक्तिभिः सह इति मंत्रं
पठित्वा। वह्न्नासारंध्रेण पुष्पांजलौ आनियमूलेन पुष्पप्रक्षेपेण मूर्तौ संयोज्य आवाहन्यादिमु
द्राः प्रदर्श्य॥ आवाहनी स्थापिनी सांनिधापिनी संरोधिनी संमुखीकरणी। देवतांगे षडंगन्या
10 सः। सकलीकरणं। अवगुंठिनी अमृतीकरणी परमीकरणी एतास्मुद्राः॥ प्रदर्शयेत्। ततो दे
व्याः प्राणप्रतिष्ठां कुर्यात्। ततः पाद्यार्घ्याचमनीयमधुपर्कार्थं पात्रचतुष्टये गंधादि क्षिपेत्।
तत्र पाद्ये दूर्वा विष्णुक्रांता श्यामाक पद्मपात्राणि। अर्घ्ये गंधपुष्पाक्षत कुशाग्र सर्षप यव दूर्वाः
आचमनीये जातिपत्र कंकोल लवंगानि॥ मधुपर्के दधि मधु घृतं। ततः मूलेन आसन पाद्या
र्घ्याचमनीय मधुपर्कान्निवेदयेत्॥ ततः सुगंधतैलोष्णोदक पंचामृततीर्थोदकैः स्नाप
यित्वा॥ पुनराचमनं दत्वा पट्टदुकूलयुगं कंचुकं गंधं अलंकारान् सौभाग्यद्रव्याणि पुष्पाणि १०

चसमर्प्यावरणानि पूजयेत् ॥ यथा ॥ त्रिकोणे देवि दक्षिणे ॥ महालक्ष्म्यै ॥ वामे महासरस्वत्यै । त्रि
कोणे पुरत आरम्भ प्रादक्षिण्येन कोणत्रये ॥ सरस्वति सहिताय ब्रह्मणे नमः । श्रीसहिता
य विष्णवे । उमासहिताय शिवाय ॥ इति संपूज्य ॥ तदग्रे सिंहासन ॥ दक्षिणे महिषासन ।
ततः षट्कोणे पुरत आरभ्य ॥ ॐ नं नंदजायै नमः ॥ ॐ रं रक्तदंतिकायै ॥ ॐ शां शाकंभर्यै ।
ॐ दुं दुर्गायै । ॐ भीं भीमायै ॥ ॐ भ्रां भ्रामर्यै । इति संपूज्य ॥ ततो अष्टपत्रेषु पुरत आरभ्य ।
॥ ॐ ब्रं ब्रह्माण्यै नमः ॥ ॐ मां माहेश्वर्यै ॥ ॐ कौं कौमार्यै ॥ ॐ वं वैष्णवि ॥ ॐ वां वाराहि ॥ ॐ
नां नारसिंहि ॥ ॐ ऐं ऐंद्र्यै । ॐ चां चामुंडायै । इति संपूज्य । ततः चतुर्विंशति दले पुरत आ
रभ्य ॥ विष्णुमायायै ॥ चेतनायै । बुद्ध्यै ॥ निद्रायै ॥ क्षुधायै ॥ छायायै ॥ शक्त्यै ॥ तृष्णायै ।
क्षान्त्यै ॥ जात्यै ॥ लज्जायै । शान्त्यै । श्रद्धायै ॥ कीर्त्यै ॥ लक्ष्म्यै ॥ वृत्त्यै । श्रुत्यै । स्मृत्यै । दयायै ।

तुष्ट्यै० । मात्रे० । भ्रान्त्यै० ॥ इति संपूज्य ॥ भूगृहस्य चतुर्षु कोणेषु । गणेशाय० । क्षेत्रपालाय० । बटु
काय० । योगिनिभ्यः । इति संपूज्य । ततः पूर्वादिप्रसिद्धदिक्षु । इंद्राय नमः । अग्नये० । यमाय०
निर्ऋतये० । वरुणाय० । वायवे० । सोमाय० ॥ ईशानाय० । वरुणनिर्ऋतिमध्ये । अनंताय० । इं
द्रेशानमध्ये । ब्रह्मणे० । ततः इंद्रादिसमीपे ॥ वज्राय० । शक्तये० । दंडाय० । खड्गाय० । पाशाय० ।
अंकुशाय० । गदायै० । त्रिशूलाय० ॥ चक्राय० । पद्माय नमः ॥ इत्यावरणपूजां कृत्वा । ततः मूले
न धूपदीपौ दत्वा । नैवेद्यमस्त्रेणाभिमंत्र्य मूलेन प्रोक्ष्य कवचेनावगुंठ्य धेनुमुद्रयामृतीकृत्य मू
लेन निवेद्य ग्रासमुद्रां प्रदर्श्य मध्ये पानीयं उत्तराचमनं दत्वा करोद्वर्तनं फलतांबूलदक्षिणाछ
त्रचामरदर्पणादि निवेद्य नीराजनं कृत्वा ॥ नमस्कारप्रदक्षिणाः कृत्वा । पुष्पांजलिं दत्वा माषभक्त
कूष्मांडादि बलिं दत्वा पूजां समर्पयेत ॥ अथ कुमारीपूजा ॥ ताश्च प्रत्यहं नव पूज्याः ॥ अशक्तौ ए ११

न्या। तत्र सुगंधतैलेनाभ्यंगं कारयित्वाऽलंकृतां तां पीठे उपवेश्य देशकालौ स्मृत्वा ममामुककका
मनासिद्ध्यर्थं अमुकवर्षिणीं कुमारीं पूजनमहं करिष्ये॥ इति संकल्प्य॥ मूलेन षडंगं कृत्वा॥ मू
लमुच्चार्य॥ मंत्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीं॥ नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहं
॥ इति मंत्रेणावाह्यासने पाद्यं च दत्वोष्णोदकेन पादौ प्रक्षाल्यार्घ्याचमनस्नानपदं दुकूलं वैस
वस्त्रं कंचुकालंकारादि दत्वा सुगंधेनानुलिप्य हरिद्राकुंकुमसिंदूरांजनपुष्पमालाभिरभ्य
र्च्य धूपदीपौ दत्वा पायसादिनानाभक्ष्यैर्भोजयेत्॥ भोजनकाले च मूलमंत्रं सप्तशतीं च जपे
त्॥ ततो नानाफलतांबूलदक्षिणां दद्यात्॥ एवं शक्त्या च त्र्यां दिनचतुष्टये द्विगुणादिवृध्या
कार्यं॥ ततो देव्यै पूजां समर्प्य सर्वे विप्राः कृतांगन्यासाः अष्टोत्तरशतेन नवार्णं वा जपित्वा॥ क
वचार्गलाकीलकानि सप्तशतीं जप्त्वा॥ अंते रहस्यानि नवार्णं चाष्टोत्तरशतं ज

पयेयुः॥ ऋग्वेदादिनां प्रतिपाठं नारत्निः॥ एवमृत्विजः प्रत्येकं प्रथमे दिन एकं॥ द्वितीये द्वे॥ तृतीये
त्रीणि॥ चतुर्थे चत्वारि रूपाणि॥ इत्येवं जपं कुर्युः॥ प्रत्येकमयुतं संपुटीकरणेन जपात्सथकृन
वार्णमंत्रं च जपेयुः॥ ऋत्विजां कर्तुश्च क्षीरमात्राशनं हविष्याशनं वा॥ ब्रह्मचर्यं भूमिशा
यनं स्पृश्यास्पृश्यादिनियमाश्च॥ एवं दिनचतुष्टयं कृत्वा॥ पंचमे दिने होमः॥ तत्र॥ होमे तंत्रं तु
स्वशाखोक्तमेव॥ तथैव शिष्टाचारात्॥ रात्रिसूक्तं देवीसूक्तं जातवेदसे शताक्षरं व्याहृतिप
दानि यच्चद् दूरके इत्यादि वैदिकमंत्रयोगदर्शनात्॥ सप्तशत्याः पुराणमंत्रत्वात्॥ रहस्ये
स्वाग्नेर्ग्नाविति सूक्तेश्च॥ स्वगृह्योक्तप्रकारेणाग्निं संस्थाप्य पायसादि द्रव्यैरेकैको द्विजः स
प्तशतीं प्रतिमंत्रं नवार्णेन च सहस्रं जुहुयात्॥ तत आवरणदेवतानां प्रणवादि स्वाहांतै
र्नाममंत्रैरेकैकामाहुतिं हुत्वा पूर्णाहुतिं हुत्वा कुमस्यां देवीं संपूज्य बलिदानं विधाय॥ ऋ ११

त्विग्भ्यः प्रत्येकं निष्कं अशक्तौ सुवर्णं दक्षिणां दद्यात् ॥ ततो विप्राः कलशोदकेन यजमानं वैदि-
कैः पौराणैश्च मंत्रैरभिषिंचेयुः ॥ ततः शतं विप्रान्भोजयेत् ॥ तेभ्योपि यथाशक्ति दक्षिणां दद्या-
त् ॥ शतचंडी दशगुणो विधिः ॥ सहस्रचंड्यां ॥ तद्दशगुणो विधिः ॥ अयुतचंड्यां ॥ तद्दशगु-
णो लक्षचंडी विधिः ॥ जपे होमे दक्षिणायां विप्रभोजने च दशगुणत्वं ॥ दशब्राह्मणैः सा च-
त्वारिंशद्दिनैः सहस्रचंडिः कार्या ॥ तत्र प्रथमे दशके एकैकावृत्तिः ॥ द्वितीये दशके द्वे ॥ तृती-
ये दशके तिस्रस्तिस्रः ॥ चतुर्थे चतस्रः ॥ ॥ एवं शतब्राह्मणैश्चत्वारिंशद्दिनैरयुतचंडी ॥ इ-
ति प्रकारांतरं क्वचित् ॥ इति रुणकरोपनामकनरसिंहभट्टात्मजनारायणभट्टसूनुश्री-
कृष्णभट्टकृतो मंत्रमहोदध्यनुसारी शतचंडीप्रयोगः ॥ संवत् १८ । १७ माघशुदी । ७ । रवीवासरे ।

पद्धतिः

२१०

ज्ञानचंद्रयोग